शीतशुष्कान्नसेविनस्तदन्नपानमनिलप्रपीड़ितं श्लेष्मणा च विबद्धमार्गमतिमात्रप्रलीनमलसत्वान्न वहिर्मुखी भवति। ततश्छर्द्यतीसारवर्ज्यान्यामप्रदोषलिङ्गान्यभिदर्शयति अतिमात्राणि। अतिमात्रप्रदुष्टाश्च दोषाः प्रदुष्टामबद्धमार्गास्तिर्य्यगागच्छन्तः कदाचित् केवलमेवास्य शरीरं दण्डवत् स्तम्भयन्ति। ततस्तमलसकमसाध्यं ब्रुवते।
विरुद्धाध्यशनाजीर्णाशनशीलिनः पुनरेव दोषमामविषमित्याचक्षते भिषजो विषसदृशलिङ्गत्वात्। तत्परमसाध्यमाशुकारित्वात् विरुद्धोपक्रमत्वाच्चेति। तत्र साध्यमामं प्रदुष्टमलसीभूतमुल्लेखयेत्। पाययित्वा सलवणमुष्णवारि। ततः स्वेदनवर्त्तिप्रणिधानाभ्यामुपाचरेदुपवासयेच्चैनम्।
इति चरकः॥)

अलसा, स्त्री, (लस+अच्, ततो नञ्समासः, स्त्रियां टाप्।) हंसपदीलता। इति मेदिनी॥ हंसपदीशब्देऽस्य गुणादयो ज्ञेयाः॥

अलसेक्षणा, स्त्री, (अलसे ईक्षणे यस्याः सा।) स्त्रीविशेषः। सा अलसदृष्टियुक्ता। इति हेमचन्द्रः॥

अलक्षणं, क्ली, (लक्षणमनुमापकं सुचिह्नं, विरोधे नञ्, नञ्समासः।) दुर्लक्षणं। मन्दचिह्नं।
("आचारात् धनमक्षय्यमाचारो हन्त्यलक्षणम्"।
इति मनुः।) तद्विशिष्टे त्रि॥

अलक्ष्मीः, स्त्री, (न लक्ष्मीः, नञत्र विरोधे।) नरकदेवता। तत्पर्य्यायः। निरृतिः २। इत्यमरः॥ कालकर्णी ३। इति शब्दरत्नावली॥ कालकर्णिका ४। इति जटाधरः॥ ज्येष्ठादेवी ५ इति पाद्मोत्तरखण्डं॥ तस्या विवरणं ज्येष्ठाशब्दे द्रष्टव्यं॥ * ॥ दीपान्वितामावास्यायां तस्याः पूजाविधिर्यथा। तत्र प्रदोषे आदौ आचारादलक्ष्मीपूजनं। इत्याचार्य्यचूड़ामणिप्रभृतयः॥ गोमयपुत्तलिकां निर्माय वामहस्तेन कृष्णपुष्पं गृहीत्वा ध्यायेत्।
"अलक्ष्मीं कृष्णवर्णां द्विभुजां कृष्णवस्त्रपरीधानां लौहाभरणभूषितां शर्कराचन्दनचर्चितां गृहसम्मार्ज्जनीहस्तां गर्दभारूढ़ां कलहप्रियां"। इति ध्यात्वा विमुखेन "ॐ अलक्ष्म्यै नमः" इत्यनेन निर्म्माल्येन कृष्णपुष्पेण संपूज्य प्रणमेत्।
"(ॐ)अलक्ष्मीस्त्वं कुरूपासि कुत्सितस्थानवासिनी।
सुखरात्रौ मया दत्तां गृह्ण पूजाञ्च शाश्वतीं॥
दारिद्र्यकलहप्रिये देवि! त्वं धननाशिनी।
याहि शत्रोर्गृहे नित्यं स्थिरा तत्र भविष्यसि॥
यदि त्वं मे महाभागे प्रीता भवसि सर्व्वदा।
पुत्त्रबन्धुकलत्रेषु कदाचिन्नागमिष्यसि॥
गच्छ त्वं मन्दिरं शत्रोर्गृहीत्वा चाशुभं मम।
मदाश्रयं परित्यज्य स्थिरा तत्र भविष्यसि"॥
ततः शूर्पवाद्येन सीमान्ते तां विसृजेत्।
इति कृत्यचन्द्रिका॥ * ॥ किञ्च।—
"एवं गते निशीथे तु नारी च स्वगृहाङ्गनात्।
अलक्ष्मीञ्च वहिष्कार्य्या अमन्त्रञ्च यथाविधि"॥
इति तत्त्वतत्त्वार्णवधृतब्रह्मपुराणं॥ * ॥
"एवं गते निशीथे तु जने निद्रार्द्धलोचने।
तावन्नगरनारीभिः शूर्पडिण्डिमवादनैः॥
निष्काश्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहाङ्गनात्"॥
इति निर्णयसिन्धौ मदनरत्नधृतभविष्यपुराणं॥

अलातं, क्ली, (ला+क्त, नञ्समासः।) अङ्गारः। इत्यमरः॥ (अर्द्धदग्धकाष्ठः।
"कुरुतेऽस्मिन्नमोघेऽपि निर्व्वाणालातलाघवम्"।
इति कुमारसम्भवे।)

अलाबुः, पुं, स्त्री, (न लम्बते, न+लवि ऊणित् नलोपश्च वृद्धिः।) लताविशेषः तत्फलञ्च। लाउ इति ख्याता। तत्पर्य्यायः। तुम्बः २ तुम्बकः ३ तुम्बा ४ तुम्बी ५ पिण्डफला ६ महाफला ७ आलाबुः ८ एलाबुः ९ लाबुः १० लाबुका ११। इत्यमरः तट्टीका च॥ तुम्बिका १२ तुम्बिः १३ अलाबुः १४। इति शब्दरत्नावली॥ अस्या गुणाः।
"अलाबुः कथिता तुम्बी द्विधा दीर्घा च वर्त्तुला
मिष्टं तुम्बीफलं हृद्यं पित्तश्लेष्मापहं गुरु॥
वृष्यं रुचिकरं प्रोक्तं धातुपुष्टिविवर्द्धनं"।
इति भावप्रकाशः॥ भेदकत्वं कफकारित्वं। गुरुपाकित्वं। हिमत्वं। पित्तनाशित्वञ्च। तन्नाड़ीगुणाः। गुरुत्वं। मधुरत्वं॥ मलभेदकत्वं। वातश्लेष्मकारित्वं। रूक्षत्वं। शीतलत्वं। पित्तनाशित्वञ्च। इति राजवल्लभः॥
("वर्च्चोभेदीन्यलाबूनि रूक्षशीतगुरूणि च"।
इति चरकश्च।
"अलाबुर्भिन्नविट्का तु रूक्षागुर्व्वतिशीतला"।
इति च सुश्रुतः॥)

अलारं, क्ली, (अरार्य्यते, ऋ+यङ्लुक्+अच् रस्य लः।) कवाटं। इति शब्दरत्नावली॥

अलिः, पुं, स्त्री, (अलति दंशे समर्थो भवति यः, सः, अल+इन्।) भ्रमरः।
("अलिपङ्क्तिरनेकशस्त्वया,
गुणकृत्ये धनुषो नियोजिता"।
इति कुमारसम्भवे।
"अनुगतमलिवृन्दैर्गण्डभित्तीर्विहाय"।
इति रघुवंशे।) वृश्चिकः। इत्यमरः॥ काकः। कोकिलः। इति शब्दरत्नावली॥ मदिरा। इति मेदिनी॥ (वृश्चिकराशिः।)

अलिकं, क्ली, (अल्यते भूष्यते, अल+कर्म्मणि इकन्।) ललाटं। इत्यमरः॥

अलिकुलसङ्कुलः, पुं, (अलिकुलेन सङ्कुलः व्याप्तः, तृतीयातत्पुरुषः।) कुब्जकवृक्षः। इति राजनिर्घण्टः॥

अलिगर्द्धः, पुं, (अलिरिव वृश्चिक इव गृध्नोति, गृध्+अच्।) जलसर्पः। आलाध इति ख्यातः। इति शब्दरत्नावली॥

अलिजिह्वा, स्त्री, (अलिरिव क्षुद्रा जिह्वा,।) जिह्वोपरि क्षुद्रजिह्वा। आलजिव इति ख्याता। इति शब्दरत्नावली॥

अलिजिह्विका, स्त्री, (अलिजिह्वा एव स्वार्थे कन्; टाप्।) अलिजिह्वा। इति शब्दरत्नावली॥

अलिञ्जरः, पुं, (अल+इन, अलिं सामर्थ्यं जरयति जृणाति वा, अलि+जॄ+अच्, पृषोदरादित्वात् साधुः।) मृदादिनिर्म्मितजलाधारविशेषः। जाला इति ख्यातः। इत्यमरः॥
("उदकान्तमुपनीय मत्स्यं वैवस्वतो मनुः।
अलिञ्जरे प्राक्षिपत्तं चन्द्रांशुसदृशप्रभं"॥
इति महाभारते।)

अलिदूर्व्वा, स्त्री, (अलिरिवाकारेण दूर्व्वा।) मालादूर्व्वा। इति राजनिर्घण्टः॥

अलिन्दः, पुं, (अलते भूष्यते, अल+कर्म्मणि बाहुलकात् किन्दच्।) वहिर्द्वारसंलग्नचतुरस्रकृत्रिमभूमिः। तत्पर्य्यायः। प्रघाणः २ प्रघणः ३ वहिर्द्वारप्रकोष्ठः ४ आलिन्दः ५। इत्यमरः॥ गृहद्वारपिण्डकः। अलिन्दः नाप्नोति अलस् इन्द कस्यादिः। यस्यामलिन्देषु न चक्रुरेवेति माघः। स्वार्थे णो आलिन्दो दीर्घादिरपि।
"गृहैकदेशे आलिन्दः प्रघाणःप्रघणस्तथा"।
इत्यमरदत्तः। अथ पिण्डक आलिन्द इति हड्डः। इह तूभयमेव श्लेषादिति साम्भः।
इत्यमरटीकायां भरतः॥ * ॥ अन्यच्च।
"प्रघाणप्रघणालिन्दा द्वारवाह्यप्रकोष्ठके।
गृहाभ्यन्तरशय्यार्थपिण्डिकायामपि त्रयं॥
आलिन्दः स्यादलिन्दोऽपि स्यादलिन्दक इत्यपि"।
इति शब्दरत्नावली॥
("शुक्लाङ्गनीलोपलनिर्म्मितानां
लिप्तेषु भासा गृहदेहलीनां।
यस्यामलिन्देषु न चक्रुरेव
मुग्धाङ्गना गोमयगोमुखानि॥"
इति माघः।)

अलिपकः, पुं, स्त्री, (कुत्सितवर्णेन लिप्यते, लिप+बाहुलकात् कर्म्मणि वुन्।) भ्रमरः। कोकिलः। कुक्कुरः। इति मेदिनी॥ (वृश्चिकः।)

अलिपत्रिका, स्त्री, (अलिर्वृश्चिक इव पत्रमस्याः, कपि अत इत्त्वम्।) वृश्चिकाख्यक्षुपः। इति राजनिर्घण्टः॥

अलिपर्णी, स्त्री, (अलिरिव पर्णमस्याः, ङीप्।) वृश्चिकालीवृक्षः। इति राजनिर्घण्टः॥

अलिप्रियं, क्ली, (अलीनां प्रियं षष्ठीतत्पुरुषः।) रक्तोत्पलं। रक्तपद्मं। इति त्रिकाण्डशेषः॥

अलिप्रिया, स्त्री, (अलीनां प्रिया, षष्ठीतत्पुरुषः।) पाटलावृक्षः। इति रत्नमाला॥

अलिमकः, पुं, (अलिरिव मक्कते, मक्क+अच्, पृषोदरादित्वात्कलोपः।) भेकः। कोकिलः। भ्रमरः। पद्मकेशरः। मधूकवृक्षः। इति मेदिनी॥

अलिमोदा, स्त्री, (अलीन् मोदयति मुद+णिच्+अच्।) गणिकारीवृक्षः। इति राजनिर्घण्टः॥

अलिम्बकः, पुं, (न+लिपि+वुन्) पद्मकेशरः। भेकः। भ्रमरः। कोकिलः। इति शब्दरत्नावली॥ (कुक्कुरः। मधूकवृक्षः।)

अलिवाहिनी, स्त्री, (अलिं वाहयति गन्धेन, वह+णिच्+णिनि+ङीप्।) केविकापुष्पं। इति राजनिर्घण्टः॥

अली, [न्] पुं, (अलं वृश्चिकपुच्छस्थकण्टकं विद्यतेऽस्य इनि।) भ्रमरः।